F.Y.
July 2017

Reg. No. ......................................

Name ..........................................

**845**

# First Year Higher Secondary Improvement Examination

## Part - III

## SANSKRIT SAHITYA

Maximum : 80 Scores

Time : 2½ Hours
Cool off time : **15** Minutes

***General Instructions to Candidates :***

- There is a 'Cool off time' of 15 minutes in addition to the writing time of 2½ hrs.
- You are neither allowed to write your answers nor to discuss anything with others during the 'cool off time'.
- Use the 'cool off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- All questions are compulsory and only internal choice is allowed.
- When you select a question, all the sub-questions must be answered from the same question itself.

**निर्देशा: –**
सर्वे प्रश्ना: समाधेया: ।
प्रश्नान् सावधानं पठित्वा उत्तरयत ।

1. अध: प्रदत्तं श्लोकं पठित्वा निर्देशानुसारं प्रश्नानामुत्तराणि लिखत ।

   विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।
   स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।।

   क) राजा कुत्र पूज्यते? **(1)**

   ख) क: सर्वत्र पूज्यते? **(1)**

   ग) उदाहरणानुसारं अधोरेखाङ्कितपदस्य सन्धिच्छेदं कुरुत । **(1)**
   चैव – च + एव ।

   घ) श्लोकस्य अस्य आशयं लिखत । **(3)**

2. अधः प्रदत्तस्य श्लोकस्य गद्यक्रमं पूरयत ।

वरमेको गुणी पुत्रो न च मूर्खशतान्यपि ।
एकश्चन्द्रस्तमो हन्ति न तु तारागणाः क्वचित् ।।

एकः च गुणी पुत्रः ............ । मूर्खशतान्यपि ........... । एकः चन्द्रः तमो हन्ति । न तु .......... क्वचित् । **(3)**

3. प्रदत्तां खण्डिकां पठित्वा रेखाङ्कितपदानां स्थानेषु कोष्ठात् समानार्थकपदानि प्रयुज्य पुनर्लिखत ।

ततश्च तेन औत्सुक्यात् मृतसत्वस्य अस्थिसञ्चयः कृतः । द्वितीयेन चर्ममांसरुधिरं संयोजितम् । तृतीयोऽपि यावज्जीवं सञ्चारयति तावत् सुबुद्धिना निषद्ध – भो तिष्ठतु भवान् । एष सिंहो निष्पाद्यते । यदि एनं सजीवं करिष्यति ततः सर्वानपि व्यापादयिष्यति इति तेन अभिहितः ।

(उक्तः, जीवसहितं, हनिष्यति, आकांक्षया, सृज्यते।) **(5)**

4. कोष्ठात् समुचितम् उत्तरं चित्वा लिखत ।

क) पञ्चतन्त्रस्य कर्ता कः? (विष्णुशर्मा, कालिदासः, भर्तृहरिः, सकुमारकविः) **(1)**

ख) केषां वसुधैव कुटुम्बकं भवति? (लघुचेतसां, मूर्खाणां, उदारचरितानां, खलानां) **(1)**

ग) नारायणीयकाव्ये कं देवं स्तौति? (शबरिगिरीशं, व्याघ्रालोमेशं, पूर्णत्रयीशं, गुरुपवनपुरेशम्) **(1)**

घ) विश्वभानुरिति महाकाव्ये कस्य चरितं वर्णयति?
(विवेकानन्दस्य, श्रीरामकृष्णपरमहंसस्य, शारदादेव्याः, श्रीशङ्करस्य) **(1)**

ङ) कंसामात्येषु प्रमुखः कः? (अरिष्टः, प्रलम्बः, तृणावर्तः, कालनेमिः) **(1)**

5. प्रदत्तेषु इष्टतमं श्लोकं चित्वा सकारणं विशदयत ।

दुःखेन बुबुधे सीतां हनूमानलङ्कृताम् ।
संस्कारेण यथा हीनां वाचमर्थान्तरां गताम् ।।

अहं रामस्य सन्देशात् देवि दूतत्वमागतः ।
वैदेहि कुशली रामः स त्वां कौशलमब्रवीत् ।।

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।
एति जीवन्तमानदो नरं वर्षशतादपि ।। **(6)**

6. यथोचितं योजयत ।

| क | | ख | |
|---|---|---|---|
| अ) | मेल्पुत्तूर् नारायणभट्टपाद: | 1) | आश्चर्यचूडामणि: |
| ब) | कुलशेखर: | 2) | केरलोदयम् |
| क) | डा. के. एन्. एषुत्तच्छन् | 3) | धर्मसागर: |
| ड) | शक्तिभद्र: | 4) | तपतीसंवरणम् |
| इ) | पि. के. नारायणपिल्ला | 5) | नारायणीयम् |

**(5)**

7. अध: प्रदत्तं गद्यभागं पठित्वा प्रदत्तानां प्रश्नानामुत्तराणि लिखत ।

केरलीयसंस्कृतकविषु अन्यतमो भवति महाकवि: रामपाणिवाद: । पालक्काड् जनपदे किळ्ळिकुरुश्शिमङ्गले कविरयं लब्धजन्मा अभूत् । कैरलीसाहित्ये प्रसिद्ध: कुञ्चन् नम्पियार् रामपाणिवाद एव इति केचित् अभिप्रयन्ति । रामपाणिवादस्य रचनासु राघवीयं, विष्णुविलास: इति महाकाव्यद्वयं, चन्द्रिका, लीलावती इति वीथीद्वयं, आख्यायिका पद्धति:, प्राकृतवृत्तिरिति व्याकरणग्रन्थौ च प्रसिद्धा: । श्रीकृष्णविलासकाव्यस्य विलासिनी व्याख्या च तेनैव विरचिता । प्रायश: अष्टविंशत्यधिका: ग्रन्था: तेन विरचिता: इति पण्डितानां मतम् ।

क) रामपाणिवाद: कुत्र लब्धजन्मा अभूत्?

ख) राघवीयमहाकाव्यस्य कर्ता क:?

ग) श्रीकृष्णविलासकाव्यस्य रामपाणिवादविरचिताया: व्याख्याया: नाम किम्?

घ) कति ग्रन्था: रामपाणिवादेन विरचिता:?

ङ) रामपाणिवादविरचितौ प्रसिद्धौ व्याकरणग्रन्थौ कौ? **(5)**

8. अध: प्रदत्ते वाक्ये क्त्वान्त-ल्यबन्त-तुमुन्नन्त-अव्ययपदानि चित्वा लिखत ।

रावणवधानन्तरं विभीषणं लङ्काधिपतिम् अभिषिच्य पुष्पकविमानेन समुद्रं तीर्त्वा श्रीराम: अयोध्यां आगन्तुम् उद्युक्त: अभूत् । **(3)**

9. प्रदत्तं सम्भाषणांशं मातृभाषायां अनुवदत ।

देवकी – क्व आर्यपुत्र इमं नेष्यति ।

वसुदेव: – अहमपि न जाने । अथवात्र दैवं विधास्यति तत्र बालं गृहीत्वा अपक्रामयति ।

देवकी – आर्यपुत्र इच्छाम्येनं सुदृष्टं कर्तुम् ।

वसुदेव: – किं राहो: वदनमण्डले अयं शशाङ्क: द्रष्टव्य: । त्वया सुदृष्टस्यास्य मृत्यु: कंसो भविष्यति ।

देवकी – सर्वथा न भविष्यति ।

वसुदेव: – यद् भवत्या अभिहितं तद् सर्वदैवतैरभिहितं भवतु । आनयैनम् । **(6)**

10. सूचना: आधारीकृत्य वसुदेवस्य स्वभावनिरुपणं कुरुत ।
(धीर: – कंसं प्रति भीत: – पुत्रं दुष्टात् कंसात् निलीयते – नन्दगोपहस्ते तं निक्षिपति) **(8)**

11. अध: प्रदत्तं सम्भाषणांशं पूरयत ।
पुत्र: – माता ............................... ।
माता – स्वस्ति । विजयी भव । को वा विशेष:?
पुत्र: – ..................................... । **(2)**

12. अध: प्रदत्तं श्लोकं पठित्वा सूचनानुसारं आस्वादनटीकां लिखत ।

विना गोरसं को रसो भोजनानाम्
विना गोरसं को रसो भूपतीनाम् ।
विना गोरसं को रसो कामिनीनाम्
विना गोरसं को रसो पण्डितानाम् ।।
(आमुखम् – आशयम् – स्वाभिप्रायम्) **(5)**

13. सूचनानुसारं कंसस्य अमात्यानां च मन्त्रणमधिकृत्य ह्रस्वोपन्यासं लिखत ।
(**सूचना :** अमात्याह्वयनम् – भगिनीसुतहननम् – देवीरुपदर्शनम् – शत्रुवधोपायचिन्तनम्) **(8)**

14. अध: प्रदत्तस्याशयस्य प्रतिपादकं श्लोकांशं चित्वा लिखत ।
विष्णुरेव अस्मान् हन्तुं भूजात: ।

क) महीयस: किं घटते पराग:
समीरणस्याभिमुखं प्रसक्तुम् ।

ख) अजायतोर्व्यामसुरान् निहन्तुम्
स एव मन्ये सरसीरुहाक्ष: । **(2)**

15. अध: प्रदत्तयो: श्लोकांशयो: वसन्ततिलकावृत्तयुक्तं श्लोकांशं चित्वा लिखत । तस्य वृत्तस्य लक्षणं च लिखत ।
चित्रे निवेश्य परिकल्पितसत्वयोगा ।
अथ वारिणि घोरतरं फणिनम् ।। **(6)**

16. उपमालङ्कारस्य लक्षणं सोदाहरणं विशदयत ।
(**सूचना :** उपमानम् – उपमेयम् – साधारणधर्म: – उपमावाचक:) **(5)**

HSE I July 2017 Code No: 845

| | Sanskrit Sahithya | Answer Key | |
|---|---|---|---|
| Sl.No | Value Points | Split Score | Total |
| 1 | क. स्वदेशे, ख. विद्वान्ग. , ग. न एव<br>ङ. उचित उत्तरलेखनाय पूर्णाङ्काः देयाः ३ ३ | 1+1+1+1+3 | 6 |
| 2 | न, तमो, तारागणाः | 3 | 3 |
| 3 | आकाक्षया,सृज्यते,जीवसहितम्, हनिष्यति,उक्तः | 1+1+1+1+1+1 | 5 |
| 4 | क. विष्णुशर्मा, ख. उदारचरितानाम्,<br>ग. गुरुपवनपुरेशम्, घ. विवेकानन्दस्य,<br>ङ प्रलम्बः | 1+1+1+1+1+1 | 5 |
| 5 | श्लोकचयनाय अङ्कद्वयम्, सकारणं<br>विशदयितुं चत्वारः अङ्काः | 2+4 | 6 |
| 6 | १-५, २-४, ३-२, ४-१,५ -३ | 1+1+1+1+1+1 | 5 |
| 7 | उचित उत्तरलेखनाय प्रत्येएकैकस्य<br>प्रश्नस्यकृते एकैकाङ्काः देयाः | 1+1+1+1+1+1 | 5 |
| 8 | तीर्त्वा ,अभिषिच्य ,आगन्तुम् | 1+1+1 | 3 |
| 9 | उचितलेखनायपूर्णाङ्काः देय़ाः | 6 | 6 |
| 10 | सूचनांअनुसरति चेत् पूर्णाङ्काः देय़ाः | 8 | 8 |
| 11 | उचितोत्त्रस्यकृते एकैकाङ्काः | 1+1 | 2 |
| 12 | सूचनांअनुसरति चेत् पूर्णाङ्काः देय़ाः | 5 | 5 |
| 13 | सूचनांअनुसरति चेत् पूर्णाङ्काः देय़ाः | 8 | 8 |
| 14 | ख | 2 | 2 |
| 15 | .चयनाय अङ्कदवयं,लक्षणलेखनाय चत्वाराः अङ्काः | 2+4 | 6 |
| 16 | लक्षणलेखनाय त्रयः अङ्काः , सोदाहरणं<br>विशदयति चेत् पूर्णाङ्काः देयाः | 5 | 5 |
| | | | 80 |

1/1